भेदस्योपाधिकत्वेन तस्य वचनेन निवृत्तिः संभवतीति दर्शयति ॥ अत एवेति ॥ स्वाभाविक भेदस्य निवृत्तिर्न संभवती
ति यतः ॥ अतः कारणान्मूढधिया अविवेकिना आत्मनि स्वस्मिन्विषयेण सह आरोपितमध्यस्तमतद्धर्मं तत्त्वमसी
तिवचनं प्रतिषेधति निरस्यति आरोपितनिषेध्यत्वे दृष्टांतं दर्शयति ॥ अग्निवत् भूमिगुणमिति भूमिगुणं गंधम
ग्नावारोपितं यथा प्रतिषेधति पृथिव्या एव गंधवत्त्वात् तद्वदत्राप्यस्मिन् तत्त्वमस्यहं ब्रह्मास्मि अस्थूलमनण्वह्र
स्वमशब्दमस्पर्शमित्यादिकं वचनमात्मन्यविवेकिनारोपितातद्धर्मनिषेधमुखेनाखंडैकरसं वस्तुपरमित्य र

यत एवमतो विषयस्य गुणं विषयेण सहात्मनि मूढधिया ॥ अध्यारोपितमग्नौ भूमिगुणं प्रति
षेधति तत्त्वमसीति वचः ॥ ७२ ॥ अत एव न हि विधानपरं गुणवादपरं च न तद्वचनं ॥ स्तुति
वाद्यपि नेतदुपास्यतया विधिरत्र न देहभृतोऽस्ति यतः ॥ ७३ ॥

र्थः ॥ ७१ ॥ यस्मादेवं वाक्यस्य वस्तुपरत्वं सिद्धं तस्मादुपासनापरत्वं नास्तीति सिद्धमित्याह अत एवेति ॥ अत ए
व वाक्यस्याखंडवस्तुपरत्वादेव तद्वाक्यं न हि विधानपरं नोपासनाविधिपरं भवेत् तथा गुणवादपरं च न भ
वेत् मघवानसि विष्णुरसीत्यादिवत् स्तुतिवाद्यपि न भवेत् स्तुतिपरं च न भवेत् मुख्यार्थसंभवे गौणार्थक
ल्पनाया अनुचितत्वादित्यर्थः ॥ उपासनापरत्वाभावे हेतुमाह ॥ उपास्यतयेति ॥ अत्रास्मिन् तत्त्वमसिवाक्ये
देहभृतो जीवस्य ब्रह्मत्वेनोपास्यतया विधिर्नास्ति लिङ्लोडादि यदर्थं नास्ति यतस्ततः ॥ कारणादुपासनापर
त्वं न भवेदित्यर्थः ॥ ७३ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham.

श्रु० सार एवं सति विपरीतबोधकत्वं च नास्तीत्याह सत एवेति ॥ जगत्प्रकृतेः सत एव जगत्कारणस्य ब्रह्मणः उपाधिवशा
१९ च्छरीरद्वयोपाधिवशाज्जीव इति नाम भवतीति यतः ॥ अत एव ब्रह्मेह तस्य सतः सदेव सोम्येदमग्र आसीदिति जग
त्कारणत्वेन प्रस्तुतस्य ब्रह्मणो जीवसतत्वकतां जीवरूपतां न प्रतिपादयति किं तर्हि जीवसंज्ञां प्राप्तस्य ब्रह्मणः
स्वाभाविकब्रह्मत्वमवबोधयतीत्यर्थः ॥७३॥ वक्ष्यमाणहेतोः श्रुतिवाक्यस्य विपरीतबोधकता नास्तीत्याह यदीति
अणिमादिगुणस्य जगत्प्रकृतेः ॥ सूक्ष्मत्वादिगुणकस्य ब्रह्मणो जीवसतत्वकतामेव वाक्यं गमयेद्यदि तर्हि

सत एव हि नाम जगत्प्रकृते रुपधानवशादिह जीव इति ॥ अत एव न जीवसतत्वकतां प्रकृ
तस्य सतः प्रतिपादयति ॥७३॥ यदि जीवसतत्वकतां गमयेदणिमादिगुणस्य जगत्प्रकृतेः ॥
नैवत् अणिमादिगुणेक्षितृकतास्य मृषा यदि वास्य शरीरभृदात्मकता ॥७४॥ न च संसृतिहेतुनिरा अप्रधान
करणं कृतमस्य शरीरभृतोऽभिमतं ॥ परमेश्वरमात्मतया ब्रुवता वचनेन च तत्त्वमसीत्यमुना ॥ ७५

स्य ब्रह्मणः अतो वाक्यात् स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेत्यादिकाद्वाक्यादणिमादिगुणेक्ष
इंघा स्यात् ब्रह्मणो मृषा स्याद् ब्राह्मर्थिकी स्यात् यदि वा अणिमादिगुणेक्षितृत्वमभिहितानां ब्रह्मणः शरीरभृदात्म
कतां जीवसतत्वकता मृषा भवेत्तस्मात्प्रकृतस्य सतो जीवसतत्वकतां न प्रतिपादयतीत्यर्थः ॥७४॥ इतो वि
परीतबोधकत्वं नास्तीत्याह न चेति ॥ परमेश्वरं परमात्मानं आत्मत्वेन आत्मतया ब्रुवता तत्त्वमसीत्यमुना
वचनेन अस्य शरीरभृतोऽभिमतमिष्टं संसृतिहेतुनिराकरणं संसारहेतोरज्ञानस्य निराकरणमिति य
स्मात्तस्माद्विपरीतबोधकत्वं न संभवतीत्यर्थः ॥७५॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham